# Shri Goda Stotram

# શ્રીગોદાસ્તોત્રમ્

## Document Information

Text title : Goda Stotram

File name : godAstotram.itx

Category : devii, varadAnanda, nadI

Location : doc_devii

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 3, 2023

*sanskritdocuments.org*

# Shri Goda Stotram

# શ્રીગોદાસ્તોત્રમ્

ॐ શ્રી
॥ શ્રીશઙ્કર ॥

(પૃથ્વી)
મુકન્દપદસમ્ભવે શિવકપર્દસંશોભિનિ
શિવે કલિમલાન્તકે પરમમઙ્ગલે પાવનિ ।
નમામિ ચરણૌ શુભાવભયદૌ નતાનાં તવ
શિશોર્મમ નયાશિવં વિલયમમ્બ ગોદાવરિ ॥ ૧॥

(શાર્દૂલવિક્રીડિત)
આચાર્યેષુ શિવાવતારયતિરાટ્, સાધ્યેષુ નિઃશ્રેયસમ્
સ્વાતન્ત્ર્યં સુખદાયિવસ્તુષુ, મતેષ્વદ્વૈતમિત્યાહ્વયમ્ ।
શીલં સર્વગુણેષુ ભાતિ ચ યથા ગોદાવરિ ત્વં તથા
સર્વાસુ પ્રમુખાપગાસુ વરદે શ્રેષ્ઠા શુભા શોભસે ॥ ૨॥

(ઉપેન્દ્રવજ્રા)
ન કેવલા ત્વં ધરણીગતાસુ
નદીષુ પૂતાસુ વિભાસિ માતઃ ।
સુરાપગાસ્વપ્યતિમાત્રશોભા
તવૈવ હે અંવ વિશુદ્ધશીલે ॥ ૩॥

(સિંહોદ્ધતા)
યા ઘ્નન્તિ તાપસતપો નિજયૌવનેન
રમ્યેણ તોષ્ટુમમરેન્દ્રમનોઽપ્સરાણામ્ ।
તાસાં વિહારસરિદસ્તિ સુરાપગા યા
સા દેવિ યાસ્યતિ કથં પદવીં શુભાં તે ॥ ૪॥

(હરિણી)
ભવતુ સુષમં રૂપં તાસામખણ્ડિતયૌવનમ્

વિલસતુ તનોર્દિવ્યો વર્ણો નદીશ્વરિ તેન કિમ્ ।
મલિનચરિતાસ્તાસાં યોગ્યા ભવેદ્ ગણિકાભિધા
ગણયતિ નરઃ કસ્તા ગોદે સતીષુ સુરાઙ્ગનાઃ ॥ ૫॥

(ભુજઙ્ગપ્રયાત)
શુભા ચારુશીલા રઘૂત્તંસભાર્યા
સતી જાનકી નિર્જરૈઃ પૂજનીયા ।
જલે પ્રત્યહં તે શિખામજ્જિતાઽઽસીદ્
અતો વન્દનીયે ત્વમેવ સ્તવાર્હા ॥ ૬॥

(શાલિની)
વાસં કુર્વે સ્વર્ગલોકેષુ યત્ર
પીયૂષં યદ્દુર્લભં માનવાનામ્ ।
શ્રેષ્ઠત્વં મે તેન શૈવાલિનીષુ
મન્દાકિન્યા ગર્વ એવં વૃથાઽસ્તિ ॥ ૭॥

(દ્રુતવિલમ્બિત)
અમૃતયુક્તમુપાયનમાદરાદ્
અવિરતં પ્રવરાઽમૃતવાહિની ।
ભવતિ દત્તવતી જગદમ્બ તે
ત્વમસિ તેન સરિત્કુલશેખરા ॥ ૮॥

(મન્દાક્રાન્તા)
ત્વત્સામર્થ્યાત્ પ્રખરમભવદ્-દ્વેષણેભ્યઃ શકારિઃ
મૂર્ધ્નિ પ્રાપ્તઃ સકલવિદુષામાશિષા તે ગુણાઢ્યઃ ।
યત્તે તીરં કલિમલહરં જ્ઞાનદેવં સુષાવ
કેષાં હિ ત્વાં તુલયિતુમલં ભૂતિરેભિર્વિશેષૈઃ ॥ ૯॥

(અનુષ્ટુપ્)
સર્વેષુ વન્દ્યા શ્રેષ્ઠા ચ, ગૌતમિ ત્વં વિરાજસે ।
આત્મોદ્ધારાય તેનાહં, સ્તવનં કર્તુમુદ્યતઃ ॥ ૧૦॥

(વંશસ્થ)
પ્રદીપમાયાન્તિ તમોહતા નરા
અપેક્ષતેઽશુદ્ધપટાય ધાવકઃ ।
સ્થાને તથાઽહં શરણં તવાગતઃ

ત્વયાવિના પાપજનસ્ય કા ગતિઃ ॥ ૧૧॥

(આર્યા)

કુરુષે વિલમ્બમમ્બે કિમર્થમર્થં વિના સમુદ્ધરણે ।
કુપિતાઽપિ તારયેમં જનં શિશુત્વેન શરણોઽસ્મિ ॥ ૧૨॥

(વિયોગિની)

ત્વમસિ ધ્રુવતારકા કિલ, પરિતસ્તે ભ્રમણં સુરર્ષયઃ ।
ઇવ મે હિ કરોત્યહર્નિશં, સકલાશાસમુદાય ઈશ્વરિ ॥ ૧૩॥

(માલિની)

વિગતવિભવલક્ષ્મી હિન્દુભૂ દાસ્યતપ્તા
તનુજચરિતશોચ્યા તે શિવેનામૃતેન ।
પ્રકટયતિ કથઞ્ચિચ્ ચારુતાં સ્વાં પ્રસિદ્ધામ્
વિધિવિલસિતદીના કુઙ્કુમેનાઙ્ગનેવ ॥ ૧૪॥

(રથોદ્ધતા)

(રથોદ્ધતા)

કલ્મષૈરુપકૃતોઽસ્મિ મામકૈઃ
પ્રાપિતો જનનિ યૈસ્તવાશ્રયમ્ ।
ઉર્વશી મનુજપૈલદર્શન -
હેતુભૂતનિકષાત્મજૈર્યથા ॥ ૧૫॥

(વિબુધપ્રિયા)

કુર્વતેઽમ્ભસિ મજ્જનં તવ ભાસ્કરપ્રમુખા ગ્રહાઃ
સ્વર્ભુવાં નિવસન્ત એ તટિનીશ્વરિ પ્રતિબિમ્બિનઃ ।
ભૂતલાઽઽગમનાક્ષમા નિજમઙ્ગલસ્ય ચ હેતુના
વર્ણ્યતે કિમુતેદૃશો મહિમા મયા જડબુદ્ધિના ॥ ૧૬॥

(સ્વાગતા)

તારયિષ્યસિ મહાવૃજિનં મા, પાપહેતિ પદવીમનુમન્યે ।
ઉચ્યતે મૃગમદસ્ય પરીક્ષા હ્યુગ્રગન્ધહરણે લશુનસ્ય ॥ ૧૭॥

(સુમન્દારમાલા)

અભક્તેઃ પુરાણાન્યનધ્યાયનાત્સર્વશાસ્ત્રાણિ વેદોક્તમન્ત્રાસ્તથા
મમાશુદ્ધવાચસ્સમુદ્ધારણાર્થં મદીયાન્મહાઘાત્સમર્થાનિ નો ।
તપો નિષ્ફલં ચઞ્ચલત્વાત્કથં નિર્ધને પ્રીણયેયુર્મયીજ્યપ્રિયાઃ

ભવાત્ત્વાં વિનેત્થં નિરાધારભૂતસ્તરિષ્યામપેક્ષાવિહીને કુતઃ ॥ ૧૮॥

(ચામર)

ન શ્રુતં ક્વચિદ્ભુવાં જલોર્મયા ભવન્ત્યલમ્

તારણાય સાગરાન્નૃણાં મહાપ્લવોપમાઃ ।

ચિત્રમેવ વીચયો જલસ્ય નેતુમમ્બ તે

પારયન્ત્યથાપરં ભવાર્ણવાત્તટં નરમ્ ॥ ૧૯॥

(સ્રગ્વિણી)

મા વિલમ્બં કૃથા મે સમુદ્ધારણે

સ્વાં પુરીમન્યથા માં હરેદન્તકઃ ।

તે સુકીર્ત્યા ભવેદમ્બ હાનિર્યતઃ

પાપમૂર્તિર્મમેવાપરો દુર્લભઃ ॥ ૨૦॥

(સ્રગ્ધરા)

પાદે ત્રૈવિક્રમીયે સુરભવનગતે પૂજનાયાર્પિતે તે

ધાત્રાઽમ્બે વિદ્યમાને શિવકરસલિલે પાવને પાવનાનામ્ ।

“દેવા રાષ્ટ્રસ્ય ગુપ્ત્યૈ” શ્રુતિવચનમિદં કિં નહિ પ્રત્યયાય

રાષ્ટ્રે સ્વાતન્ત્ર્યહીને સ્મૃતિગતવિભવે શત્રુભીત્યાઽઽકુલેઽસ્મિન્ ॥ ૨૧॥

(શિખરિણી)

ધૃતં વિષ્ણોસ્તાપાપહરચરણાબ્જાદ્ધિ જનનમ્

કૃતા શમ્ભોઃશીર્ષે હિમકરસમીપેઽપિ વસતિઃ ।

પરં નાયાતા કિં જનનિ તવ તોયે શિશિરતા

ભવેદ્યા પર્યાપ્તા વિનતજનસન્તાપશમને ॥ ૨૨॥

(શાર્દૂલવિક્રીડિત)

યસ્યાઽઽશૈશવલાલનં ચ કૃતવાન્ વૃન્દારકઃ સદ્ગુરુઃ

સોઽહં દાસગણુપ્રસાદવિકસદ્બુદ્ધિઃ સ્વયં મૂઢધીઃ ।

પદ્યૈર્વૃત્તપૃથગ્વિધૈર્દ્વિગુણિતે રુદ્રૈર્મુદા તે સ્તવમ્

ગોદેઽકારિ યથાબલં કુરુ કૃપાં નિત્યામનન્તે મયિ ॥ ૨૩॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતં શ્રીગોદાસ્તોત્રં સમ્પૂર્ણમ્ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

The unique part of this composition on

the river Godavari is that each verse
if composed in a different meter specified
in parenthesis.

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

---

*Shri Goda Stotram*
pdf was typeset on June 3, 2023

Please send corrections to *sanskrit@cheerful.com*